श्री ग१

श्रीगणेशायनमः॥समानधर्मितावच्छेदकक विशिष्टबुद्धौसमानधर्मितावच्छेदककग्राह्याभावनिश्चयोविरोधीतितदभावोहेतुः॥
न्०बा० तादृशबुद्धौचतद्धर्मावच्छिन्नविशेष्यतानिरूपिततत्संबंधावच्छिन्नतद्धर्मावच्छिन्नप्रकारताशालिलौकिकान्यदोषविशेषाजन्य
१ ता२ बुद्धित्वतद्धर्मावच्छिन्नविशेष्यतानिरूपितविशेषणविशेषसंबंधावच्छिन्नतद्धर्मावच्छिन्नतसंबंधावच्छिन्नप्रतियोगिताकाभा
वप्रकारताशालिनिश्चयत्वाभ्यांप्रतिबध्यप्रतिबंधकभावः।एवंधर्मितावच्छेदकंबाधनिश्चयदशायांधर्मांतरधर्मितावं
छेदककविशिष्टबुद्ध्युपपत्तयेनिरूपितांतंप्रकारताविशेषणं।तद्धर्मावच्छिन्नविशेष्यताकत्वस्यज्ञानविशेषणत्वेद्व्यं
वान्हिःसर्वतोघटवानित्यादिबुद्धेःपर्वतोवह्न्यभाववानित्यादिबुद्धिप्रतिबध्यत्वापत्तितोनैरर्थ्याद्दरः॥पर्वतोवह्न्यभाव
निश्चेतादृशबाधकालेजातित्वादिनापर्वतत्वावगाहिनोजातिमान्वह्निमानित्येतादृशज्ञानस्योपपत्तयेस्वरूपतस्त
द्धर्मधर्मितावच्छेदककबाधप्रतिबध्यतावच्छेदककोटौस्वरूपतस्तद्धर्मावच्छिन्नत्वमेवविशेष्यतायांनिवेशनीयंस्वरू त
पतस्तद्धर्मावच्छिन्नत्वंचतद्धर्मनिष्ठानिरवच्छिन्नावच्छेदकतात्वं॥किंचित्तद्धर्मावच्छिन्नधर्मितावच्छेदकताकबुद्धित्व ता५

संयोगि

लेचदृष्ठुगेवप्रतिबध्यप्रतिबंधकभावः।संबंधविशेषावच्छिन्नत्वस्यप्रतिबध्यतावच्छेदकप्रकारतायांनिवेशादेकसंबंधावच्छि
न्नप्रतियोगिताकयास्याभावनिश्चयदशायांसंबंधांतरसंसर्गकविशिष्टबुद्धेस्स्यादनिर्वाहः।।अथसंयोगादिसंसर्गावच्छिन्नप्रति
योगिताकयास्याभावनिश्चयदशायांस्वसमवायिसंयोगस्वसंयोगादिरूपपरंपरासंबंधावगाहिविशिष्टबुद्धेरनुदयापत्तिः।।
तादृशनिश्चयप्रतिबध्यतावच्छेदककोटौनिरवच्छिन्नसंयोगादिनिष्ठावच्छेदकताकत्वरूपस्तुहृद्संयोगावच्छिन्नत्वस्यप्रका
रताविशेषणत्वोपगमो।विशेष्यतावच्छेदेनविशेषणवत्तावगाहिन्याःसंशयात्मिकायाश्चविशिष्टबुद्धेस्तादृशनिश्चयाप्रतिब
ध्यतापत्तिःतत्रविशेष्यतावच्छेदकावच्छिन्नत्वेनविरोधेनचविशिष्टस्यसंयोगादेःसंसर्गतयाभानात्।मैवं।तद्धर्मावच्छिन्नाभा
2 वनिश्चयप्रतिबध्यतावच्छेदकगर्भेनिवेशनीयास्वसमवायिसंयोगादिरूपपरंपरासंबंधावगाहिबुद्धौसमवायनिष्ठसांस
र्गिकविषयत्वेवप्रकारतानिरूपितानतुसंयोगनिष्ठविषयतापि।अतएवकिंचित्समवायिनिरूपितसंयोगसंसर्गकबुद्धित
स्तादृशबुद्धिवैलक्षण्यं।।एवंचसंयोगिसंयोगसंसर्गकबुद्धावधिकरणविशेषणतयासंयोगनिष्ठविषयतासैवप्रकारता

स

विशेष्यतानिरू

त

निरूपितौदन्याधर्येधिकरणविशेष्यविधयासंयोगीयविषयत्वैवविशेष्यतानिरूपितेतिनतादृशबुद्धीनांदर्शितबाधप्रति
बध्यतापत्तिः।नचस्वसमवायिसंयोगसंसर्गघटकपदार्थानांएकैवसांसर्गिकीविषयता।ननुतादृशविषयताभेदःमानाभा
वात्।तथाचतद्घटकसकलपदार्थविषयत्वैवप्रकारतयाविशेष्यतयाचनिरूपितेतिकथमेतदितिवाच्यं।स्वसमवायि
संयोगसंयुक्तसमवायादिबुद्ध्योर्वैलक्षण्यस्यसांसर्गिकविषयतायामेदमन्तरेणाऽनिर्वाहात्तावत्पदार्थेषुएकविषयता
स्वीकारेचतयोर्वैलक्षण्यस्यानुपपत्तेःसंसर्गघटकपदार्थानामुभयत्राऽविशेषात्।अथास्तुविशिष्टसंसर्गकस्थलेपिशेष वि॰
पाविशेष्यभाववैलक्षण्यायसंसर्गतावैलक्षण्यंतथापिकस्यचिदेवविषयताप्रकारतानिरूपिताकस्यचिदेवविशेष्यतानि
रूपितेत्यत्रकिंनियामकं।यदीयत्वेनयस्यवस्तुनोभानंतदीयविषयतैवतद्विषयतानिरूपितेतिननियामकत्वाच्यंय
दीयत्वस्यतत्प्रतियोगित्वतदनुयोगित्वरूपस्यसंसर्गांशेविशिष्टबुद्ध्यासंस्पर्शात्।नवास्तवतदीयसंसर्गविषयतात्ववि ०राम
शेषणादिनिरूपितविषयतात्वप्रयोजकंमेनिवाच्यं।अधिकरणसंबंधेनभानेतरभावात्इतिचेन्न।स्वभावएवतन्नियाम २

मकः इति ० विशेष्यतावच्छेदकावच्छिन्नत्वादिविशिष्टसंयोगादिसंसर्गस्थले च विशेष्यतानिरूपितायाः संयोगनिष्ठसांसर्गिकवि
षयताया एव प्रकारतानिरूपितत्वं न तु संयोगादिविशेषणीभूतत्वावच्छिन्नत्वादिविषयतायाः ॥ अत एव च नानापदार्थघटित
संबंधत्वाविशेषेपि स्वसमवायिसंयोगादेः परंपरासंबंधत्वमवच्छिन्नसंयोगादेश्च साक्षात्संबंधत्वं यादृशसंसर्गभानियस्याः
सांसर्गिकविषयतायाः विशेष्यताप्रकारतोभयनिरूपितत्वं तस्य साक्षात्संबंधत्वं यादृशे विभिन्नसांसर्गिकविषयतयोरे
व प्रकारताविशेष्यतानिरूपितत्वं तस्य परंपरासंबंधत्वमित्यादिक् ॥ वह्नित्वाद्यवच्छिन्नाभावानिश्चयदशायां द्रव्यत्वादिनाव
ह्निविशिष्टबुध्येरुपपत्तये तत्धर्मावच्छिन्नाभावनिश्चयप्रतिबध्यतावच्छेदकप्रकारतायां तत्धर्मावच्छिन्नत्वविशः तत्धर्मावच्छि
न्नत्वं च तत्धर्मनिष्ठप्रकारतानिरूपकत्वं पर्वतो वह्न्यभाववानित्यादिबाधकाले जातित्वादिना वह्नित्वाद्यवगाहिनः पर्वतो जा
तिमह्निनित्यादिबोधस्य निर्वाहाय तादृशबाधप्रतिबध्यतावच्छेदककोटिप्रविष्टवह्नित्वादिप्रकारतायां किंचिन्निष्ठप्रकारतानि
रूपितविशेष्यताभिन्नत्वं वेशनीयम् ॥ वह्नित्वाद्यंशेऽन्याप्रकारकत्वं तु न तत्र न विशेषणतयोपात्तम् पर्वतो वह्निमान् जाति

०श्री० ३

महत्त्वं चेति संमूहालंबनासंग्रहप्रसंगात्पर्वतो जातिमद्वान्पर्वतो जातिमद्भाववानित्यादिषु द्वयोश्च पृथगेव प्रतिबध्यप्रति
बंधकभावः। आनुनासिकादिभिर्मेंद्रियादिजन्यबाधनिश्चयदशायां लौकिकसन्निकर्षजन्यविशिष्टबुद्धस्यालौकिका
न्यत्वस्य प्रतिबध्यतावच्छेदककोटिप्रवेशः। तत्त्वप्रकृते विशेषणांशे लौकिकं यत्र तदन्यत्वमतोन्यांशे लौकिकतदुपनीतभानस्य
न तदभावनिश्चयप्रतिबध्यत्वानुपपत्तिः तदंशे लौकिकत्वं च तद्वृत्तिलौकिकसन्निकर्षजन्यत्वं लौकिकसन्निकर्षजन्यज्ञाने
तदुपनीतभावादिव्यावृत्तविषयताविशेषस्य प्रामाणिकत्वेनान्निष्ठविलक्षणविषयतानिरूपकान्यत्वमेव तत्त्वं। केचित्तु लौ
किकत्वस्य बाधाभावादिजन्यतावच्छेदकत्वे बाधशून्यकाले लौकिकज्ञानसामग्रीसत्त्वेपि लौकिकान्यज्ञानत्वावच्छिन्नापत्तिः बाधाभा
वरूपतद्धर्मावच्छिन्नोत्पादककारणसत्त्वादतो बाधाभावादिजन्यतावच्छेदककोटौ लौकिकान्यत्वं न निवेशनीयं किंतु बाधादिषु
लौकिकप्रत्यक्षसान्निकर्षमुत्तेजकीकृत्य तत्कार्यमुपपादनीयं। न च लौकिकान्यत्वावच्छिन्नोत्पत्तौ अनुमित्यादिसामग्रीसमवधान
स्यापेक्षितत्वात् लौकिकान्यज्ञानविशेषस्याप्युत्पत्तौ सामग्री[illegible]कालेनैव नोत्पत्तिसंभव इति वाच्यं। अनुमित्यादीनामि

प्रत्यक्ष १

वोपनीतभास्यापिलौकिकान्यज्ञानविशेषतयानत्सामग्रीसमवहितबाधाभाववत्त्वाल्लौकिकप्रत्यक्षसामग्रीदशायांमुक्ताप
त्तिसंभवात्।ज्ञानद्वयेयौगपद्यवारणायविजातीयज्ञानंप्रत्येवविजातीयज्ञानसामग्र्याःप्रतिबंधकत्वात्।तदिंद्रियजन्योप
नीतभानेतदिंद्रियजन्यालौकिकप्रत्यक्षसामग्र्याःप्रतिबंधकत्वेनलौकिकप्रत्यक्षसामग्रीकालेप्युपनायकज्ञानघटितोपनी
तभानेसामग्रीसंभवादित्याहुः।तन्न।बाधाभावजन्यतावच्छेदककोटौलौकिकान्यत्वाप्रवेशेपिज्ञानप्रत्यासत्तिजन्यतावच्छेदक
कोटौ।लौकिकप्रत्यक्षेव्यभिचारवारणायतस्यावश्यंनिवेशनीयतयातद्वल्लौकिकप्रत्यक्षसामग्रीकालेतदवच्छिन्नोत्पादापत्ते
रावश्यकत्वात्तदवच्छिन्नंप्रतिलौकिकसामग्र्याःप्रतिबंधकत्वमावश्यकमित्युक्तापत्तेरनवकाशात्लौकिकसान्निकर्षस्यो
त्तेजकत्वापेक्षालाघवेनलौकिकान्यत्वस्यैवप्रतिबध्यतावच्छेदकेनिवेशयितुमुचितत्वात्।यदिचज्ञानप्रत्यासत्तिजन्यताव
च्छेदककोटौज्ञानेलौकिकान्यत्वंननिवेश्यते।अपितुतज्जन्यतावच्छेदकीभूततत्सदर्थविषयतायामेवलौकिकविषयता
न्यत्वं।एवंचोभयप्रत्यासत्तिजन्यज्ञानेलौकिकविषयताजन्यतावच्छे तदन्यविषयताचस्वीक्रियतेऽविरोधादितितदानीं

ज्ञानसन्निकर्षजन्यत्वावच्छेदकावच्छिन्नोत्पन्नाविष्टापत्तिरिति विभाव्यते। नद्दाभावजन्यत्वावच्छेदककोटावपि ज्ञानांशे लौकिका
न्यत्वं न वेश्यते ऽपि तु जन्यत्वावच्छेदकीभूतविषयतायामेव लौकिकत्वं विषयताया अपि स्वीकारात् तादृशविषयताशालिज्ञानमिष्टमेवे
ति। अथ लौकिकसन्निकर्षजन्यज्ञानव्यावृत्तधर्मस्य बाधप्रतिबध्यतावच्छेदकत्वे आनुमानिकादिबाधनिश्चयदशायां लौकिक
सन्निकर्षजन्यसंशयापत्तिः॥ यत्तु लौकिकनिर्णयान्यज्ञानस्य बाधप्रतिबध्यतावच्छेदकत्वोपगमाल्लौकिकत्वासन्निकर्षजन्यसंश
यस्य तत्सति वध्यत्वं निर्वाहमिति अथवा संशयानन्तरं संदेहाल्याकारकएवानुव्यवसायो न तु साक्षात्करोमीत्याकारक इति लौकि
कविषयतासंशये नोपगम्यत इति तथा च लौकिकान्यत्वस्य प्रतिबध्यतावच्छेदकत्वेऽपि संशयस्य प्रतिबध्यत्वमुपपद्यत ए
वेति। तदसत्। तावतापि बाधनिश्चयकाले लौकिकसन्निकर्षघटितप्रत्येककोटिभासकसामग्रीबलादर्थतः संशयाप
त्तेर्दुर्वारत्वात् तथाविधप्रत्येककोटिभानसामग्र्या बाधसामग्र्यभावाघटितत्वात्। मेवं लौकिकसन्निकर्षजन्यकोटि
निश्चयोत्पत्तिदशायां स्वातन्त्र्येण कथंचिदुपस्थितस्य विपरीतकोटेर्धर्मिणि प्रकारतया भानापत्तिवारणाय समानधर्मि

त्वावच्छेदकत्वयैककोटिलौकिकप्रत्यक्षसामग्र्या विपरीतकोटिज्ञानप्रतिबंधकत्वमवश्यमंगीकरणीयं। एवं च बाध
निश्चयोत्तरमपि न लौकिकसन्निकर्षाधीनसंशयापत्तिः विपरीतकोटिभानासंभवात्। अथोक्तप्रतिबंधकताकल्पने
लौकिकसन्निकर्षात्संशयः क्वापि न स्यादिति चेत्। न भवत्येव लौकिकसन्निकर्षात्संशयः। संशयजनकदूरत्वादिदोषसत्त्वे २
पूर्वकाले कोट्युपस्थितेरावश्यकत्वात्तादृशज्ञानप्रत्यासत्तिबलात्सर्वत्र कोट्यंशे उपनीतभानात्मकस्यैव संशयस्योपग
5 मात्। अथ संशयपूर्वं कोटिभासकलौकिकस्य सन्निकर्षादिसत्वे कथं लौकिकज्ञानानुत्पादः कथं वा विपरीतकोटिभा
नमुक्तप्रतिबंधकसत्वादिति चेन्न। तदानीं लौकिकसन्निकर्षादिसत्वेपि संशयजनकदूरत्वादिदोषस्य लौकिकप्रत्यक्षप्र
तिबंधकत्वेन लौकिकसामग्र्यभावादुभयोपपत्तिरिति। यत्तु बाधनिश्चयाभावस्य कार्यसहवर्त्तितया कारणत्वाद्वै
ककोटिनिश्चयोत्पत्तिकाले विरुद्धकोट्यंतरभानापत्तिर्नेवानुमानिकादिबाधनिश्चयोत्तरं लौकिकसन्निकर्षज
न्यसंशयापत्तिस्तदानीं लौकिकसन्निकर्षबलात्तत्कोटिविशिष्टबुद्धेर्जायमानाया बाधनिश्चयस्य सत्त्वेन विपरीत

त्वकोटिभानासंभवादिति तन्न वाधाभावस्य कार्यसहवर्त्तितया हेतुत्वे यत्र प्रथमं भाविबुद्धाव प्रामाण्यग्रहस्तद्द्वितीय
५ क्षणे वाधबुद्धिस्तदुत्तरक्षणे विशिष्टबुद्ध्युत्पत्तिः पूर्वक्षणेऽप्रामाण्यग्रहाभावविशिष्टवाधबुद्धेरभावसत्वेपि
कार्यतदसत्वात् अत एव तस्य कारकमानसादिकं प्रति तदभावानुमित्यादिसामग्र्याः प्रतिबंधकत्वं कल्पयित्वैव तद
भावानुमित्युत्पादसमये तत्राप्रामाण्यग्रहसत्वे तदानीं तस्य कारकमानसापत्तेर्दुर्वारत्वाच्च आलांवावाधाभावस्यका
र्यसहवर्त्तितयैव हेतुत्वं तथाप्युक्तापत्तिदुर्वारत्वाय विपरीतकोटिभावे लौकिकसामग्र्या विरोधित्वकल्पनमा
वश्यकं तदानीं विपरीतकोटिभावे तत्कोटिज्ञानस्य निश्चयत्वसंभवेन तत्कालीननिश्चयरूपप्रतिबंधकसम
वधानस्य विपरीतकोटिभानाभावनित्वेन विपरीतकोटिभानविरहस्य तन्निश्चयप्रयुक्तत्वासामञ्जस्याद्गस्याप्र
योजकं तरानुसरणस्यावश्यकत्वात् अत एव विशिष्टबुद्धेर्बाधतदभावव्याप्यवत्तानिश्चयतदभावावच्छेदक
धर्मदर्शनानंतरस्थस्य प्रतिबंधकत्वात्ऽपि तु सर्वेषां स्वसामानाधिकरण्यस्वाव्यवहितपूर्वक्षणोत्पन्नत्वोभयसंबंधे

मतद्धर्मावच्छिन्नविशेष्यतानिरूपिततत्प्रकारताशून्यज्ञानवत्वेनानुगमय्यैकरूपेणैव प्रतिबंधकत्वं कल्प्यते वा
धाद्यनंतरक्षणे चज्ञानसामग्रीसत्त्वेऽवश्यं किंचिज्ज्ञानं स्यात्तत्र च प्रकृतधर्मितावच्छेदकविशिष्टप्रकृतविशेष
णवत्तायावत्त्वगत्वाऽभावेन तज्ज्ञाने मिंदुर्मवच्छिन्नविशेष्यतानिरूपिततत्प्रकारताशून्यमेवेति तत्संबंधेन तादृ
शज्ञानाधादिबुद्धेस्तथा बाधज्ञानवत्त्वमक्षतमेव यादृशज्ञानानंतरं फलं न जायते तादृशज्ञानानंतरस्यापन्नेन रूपेण
प्रतिबंधकत्वमिष्टमेव पटुत्तरं तु फलं जायते तस्य नैतत्प्रतिबंधतावच्छेदकाक्रांतत्वमेव यत्र तत्प्रकारकज्ञा
नानंतरं तत्प्रकारकं किंचिज्ज्ञानं तत्राव्यवहितपूर्वक्षणावृत्तित्वसंबंधेन तत्प्रकारकज्ञानवत्तायास्तत्प्रका
रकज्ञानाव्यवहितपूर्वक्षणजातबुद्धिसाधारणतस्याऽतादृशतत्प्रकारकज्ञानानुत्पादप्रसंगात्तादृशक्षणवृ
त्तित्वमुपेक्ष्य तादृशज्ञानाव्यवहितपूर्वक्षणोत्पन्नत्वस्य संबंधत्वोपगमः। अव्यवहितपूर्वक्षणोत्पन्नत्वं च स्व
प्रागभावाधिकरणसमयप्रागभावानधिकरणत्वे सति स्वप्रागभाववत्त्वं अनधिकरणमिसत्त्वोत्तरत्वे चाधि

धिकरणत्वं कालिकसंबंधेन बोध्यं। अपेक्षाबुद्धिद्वितीयक्षणोत्पन्नानान्तु स्यादेतस्यास्त्रिक्षणावस्थायित्वानुपगमे वोक्तसत्वंतं परि
त्यज्य कालिकसंबंधेन स्वाधिकरणत्वमेव निवेश्यं यत्र तद्प्रकारकज्ञानानां द्वितीयक्षणे तत्प्रकारकज्ञानं तत्र तद्प्रकारक
पूर्वक्षणोत्पन्नज्ञानस्य विनश्यदवस्थस्य प्रतिबंधकतावारणायोत्पत्तिक्षणावच्छिन्नत्वमपि प्रतिबंधकतावच्छेदके विशे
षणीयं। तदर्थं च प्रतियोग्यधिकरणत्वसंबंधावच्छिन्नप्रतियोगिताकध्वंसाभावविशिष्टत्वं द्वितीयक्षणे च तत्क्षणोत्प
न्नध्वंसस्य कालिकसंबंधेन स्ववृत्तिप्रतियोगिकत्वयोक्तसंबंधेन ध्वंसविशिष्टत्वमेव न एवं च विनश्यदवस्थस्य स्ववाधाधादेरप्र
तिबंधकत्वेपि न क्षतिः। तद्द्वितीयक्षणोत्पन्नज्ञानस्यैवोक्तस्वाक्रांततया तत्तृतीयक्षणे विशिष्टबुद्ध्यनुत्पादप्रयोजकता
दिति भ्रांतानां प्रलपितमपि निरस्तं तादृशप्रतिबंधकतावच्छेदकावच्छिन्नसमवधानस्य तत्प्रकारकज्ञानानुत्पादाधी
नत्वेन तदप्रयोजकत्वात्। अन्यथानुमित्यादिस्थलेपि एतादृशरीत्यैकैकप्रतिबंधकताकल्पनेनातिप्रसंगवारणसंभ
वेन परामर्शप्रभृतीनां तत्कारणताविलयप्रसंगादिति दिक्। अथवा धत्वबुद्धिप्रतिबध्यतावच्छेदके लौकिकान्यत्वनि

वेशेसमानेंद्रियजन्यबाधनिश्चयदशायामपि लौकिकविशिष्टबुद्धिरुत्पद्यतामिति चेन्न। तादृशबुद्धेर्बाधसामान्याप्रति
बंधकत्वस्य लौकिकत्वं प्रतिबध्यतावछेदकेऽनिवेश्य चाक्षुषत्वाद्यवछिन्नं प्रति समानधर्मितावछेदककग्राह्याभावा
चाक्षुषत्वादिनाप्रतिबंधकत्वांतरकल्पने गौरवरूपसत्संभवात्। समानेंद्रियकस्याप्युपनीतभानात्मकबाधज्ञानस्य लौ
किकप्रत्यक्षाप्रतिबंधकत्वाद्ग्राह्याभावांशे लौकिकत्वमपीदृशप्रतिबंधकतावछेदककोटौ निवेश्यं। धर्मिण्यभाव
7 स्य लौकिकप्रमास्थले तत्र प्रतियोगिनोऽसत्वेपि यत्र प्रतियोग्यधिकरण एव सन्निकृष्टाधिकरणांतरध्वंसेरभाव
स्य लौकिकप्रत्यक्षात्मक आरोपो विनश्यदवस्थनदोषेणाजनितस्तत्र तदुत्तरक्षणे तदधिकरणक्षणविशेष्यकप्र
तियोगिलौकिकप्रत्यक्षस्य यत्र वाऽभावप्रमासमकालं तद्द्वितीयक्षणे वा तादधिकरणे प्रतियोगिप्रकारकानुभूयमानारो
पजनकदोषसमवधानं तदुत्तरक्षणे तादृशारोपस्य च तल्लौकिकविषयताशालितादृशबोधत्वावारणाय चाक्षुष
स्थलीयप्रतिबध्यप्रतिबंधकभावकल्पनमित्यवगंतव्यं। यत्राभावारोपजनकदोषस्यापि वर्तमानता तत्राभावारो

पजनकदोषस्याविवर्त्तमानत्वात्तत्राभावारोपोऽस्त्विति स्यादेवं तदग्निभक्षणेपि तेनैव प्रतिबंधकेन प्रतियोगिमत्ता
बुद्धेरतिसंभवइतिप्रथमस्थलेविनश्यदवस्थदोषानुधावनं अभावप्रमास्थलेतत्पूर्वं प्रतियोग्यारोपजनकदोषसमवधानेने
नप्रतिबंधादभावप्रमैवनसंभवतीति चरमस्थलेउत्तरकालेदोषोत्साहोऽनस्तु तः छ शंखोनपीतः अयंनोरगइत्याद्यनुमानिक
शाब्दादिबोधनिश्चयदशायांपित्तद्रव्यमंडूकवसांजनरूपदोषविशेषवशात्तशंखः पीतः अयमुरगइत्यादिविशिष्टबुद्धित्वाद्दोषवि
शेषाजन्यत्वंबाधसामान्यप्रतिबध्यतावच्छेदकं निवेश्यं दोषसामान्याजन्यत्वनिवेशेऽप्रमामात्रस्यैवबाधाप्रतिबध्यत्वमसंगतस्ततो वि
शेषेति तथाचपित्तादिरूपदोषाएवविशिष्योपादेयाः नचशंखः पीतइत्यादिज्ञानेशंखीशमनुभूयमानपित्तद्रव्यपीतिमेवभासते
तथाचतादृशज्ञानस्यपीतिमांशेलौकिकतयाऽलौकिकत्वनिवेशेनैवोपपत्तेः किंपित्तद्रव्यात्मदोषाजन्यत्वनिवेशनेतिवाच्यम्।
तत्रानुभूयमानंपित्तद्रव्यंपीतिमाशंखादौ आरोपोपगमेपित्तद्रव्यस्यांतरालावस्थानदशायामपितत्रपीतिम्नः प्रत्यक्षापातात्तस्म
र्यमाणारोपस्यैवदीधितिकृतास्वीकारात्ततादृशज्ञानस्यपीतिमांशेलौकिकता नचैवंतादृशज्ञानानंतरंपीतंसाक्षात्करोमीत्य

त्व्यवसायानुपपत्तिः साक्षात्कारित्वव्यंजकलौकिकत्वाविरहात् इति वाच्यम् अयं गोरा इत्यादिदर्पमाणारोपे साक्षात्कारित्वग्रहात् लौ
किकसंनिकर्षजन्यत्वस्यैव दोषविशेषजन्यत्वस्यापि साक्षात्कारित्वव्यंजकत्वोपगमात् आधुनिकास्तु लौकिकसंनिकर्षजन्यबुद्धौ विषयदो
षविशेषजन्यज्ञानेपि तद्देशे लौकिकविषयताया एव ते दोषविशेषजन्यत्वस्य साक्षात्कारित्वग्रहहेतुताकल्पनम् उपयुक्तलाघवानुरोधात्
तथा च लौकिकान्यत्वविशेषणे नैव दोषविशेषधीव्याहतेर्वा धीभावत्वन्यतावच्छेदककोटौ दोषविशेषाजन्यत्वनिवेशनमनर्थकं न चास्य
8 र्पमाणारोपे लौकिकविषयतासाकारे तत्र लौकिकसन्निकर्षस्य व्यभिचार इति वाच्यं अन्यथान्यगतिकतया दोषविशेषाजन्यत्वस्य व्यवहि
तरत्वस्य वा तज्जन्यतावच्छेदककोटौ निवेशनीयत्वात् साक्षात्कारित्वग्रहे दोषविशेषजन्यत्वस्य हेतुत्वांतरकल्प्यं नं नानाविधतद्
भावव्याप्यवत्तादिज्ञानप्रतिबध्यतावच्छेदककोटौ दोषाजन्यत्वनिवेशं चापेक्ष्य लौकिकसन्निकर्षतन्यतावच्छेदककोटौ तन्निवेशनस्यैवौ
चित्यात् इत्याहुः शंखो न पीत इत्यादिसमानेन्द्रियजन्यबाधनिश्चयोत्पत्तिक्षणे तद्धीनोत्पत्त्योर्वा दोष समवधाने अविनष्टए
बाधनिश्चयेपि शंखः पीतः इत्याद्यारोपोऽनुभवसिद्धः तदा तदिंद्रियजन्यबाधप्रतिबध्यतावच्छेदककोटौ दोषविशेषाजन्य
त्वं निवेशनीयम् नेतरथा समानधर्मितावच्छेदकबाधकालेपीच्छाबलादाहार्यज्ञानोपपत्तये अनाहार्यत्वमपि प्रतिबध्यतावच्छेद

ककोटौ निवेश्यं अनाहार्यत्वं च इच्छाजन्यभिन्नत्वं तन्यतासंबंधेनेच्छावदन्यत्वं वा आहार्यज्ञाने च इच्छायाहेतुत्वात्तस्य तथात्वं सिद्धि
कालीनानुमितावुमिच्छायाहेतुत्वे प्रत्यक्षत्वप्रतियोगिकोटौ निवेश्यम् यत्तु आहार्यज्ञाने च इच्छायाहेतुताया अप्रामाण्यकत्वा
नस्वसामानाधिकरण्यानंतर्योभयसंबंधेनेच्छावत्त्वस्य स्वान्यत्वमेवानाहार्यत्वं तथा च इच्छाया आहार्यज्ञानाजनकत्वेन क्षतिरिति
तदसत् तस्यासति चाक्षुषेच्छाकालीनस्पार्शनादेर्वाधप्रतिबध्यतानिर्वाहाय वा सुखादिगोचरेच्छाविशिष्टचाक्षुषादिभेदकूट
स्यैतन्मते निशेनीयतयेति गौरवात् अस्मन्मते इच्छायाः स्वविषयज्ञाने प्रत्यक्षहेतुतया स्पार्शनादेर्तादृशेच्छाजन्यत्वविरहे
ण सामान्यतः प्रत्यक्षेच्छाजन्यत्वावच्छिन्नभेदस्यैव निवेशनीयत्वात् न च तन्मते आहार्यज्ञाने इच्छायाहेतुत्वकल्पनमधि
कं भवन्मतेपि आहार्यज्ञाने इच्छायाहेतुत्वस्यावश्यकं चान्यथा रच्छाकालीनज्ञानस्य वाधाप्रवध्यतया तत्स्वकीयसामग्रीव
लाद्धि नापि इच्छां वाधकाले प्रत्यक्षापत्तिः न चच्छायाश्चाक्षुषत्वावच्छिन्नं प्रति चाक्षुषेच्छात्वादिनैव हेतुता वाच्या सामान्यतस्त
द्धेतुत्वे वाधकाले स्पार्शनादिगोचरेच्छावत्त्वादपि चाक्षुषापत्तिः तथा च जन्यतानां चाक्षुषत्वस्पर्शनत्वादिभिन्नधर्म्मावच्छिन्ने
नाम ननुगततया भेदकूटनिवेशनं भवतोप्यावश्यकमिति वाच्यम् तन्यतात्वेन तथाविधसकलजन्यतानामनुगमात्

त्वेन तादृशतात्मन्नीप्रतिबंधकतापात्तेः परीरावश्यकत्वात् विशेषदर्शनस्य विपरीतज्ञानविरोधित्वेन हेतुत्वेवि
शेषदर्शनवत्तादृशदृशाताशसामग्र्यांमपि विपरीतज्ञानविशेषदर्शनासत्वपि तद्दलादेवपुरुषत्वादिप्रत्यक्षस्या
पत्तिः विशेषदृशानिहेतुतामतेप्यावश्यकत्वात् विशेषदर्शनहेतुमितिनिस्थलेऽकसत्वात्तत्तएवोपत्तिस्तज्जन्य
हावच्छेदकस्यैवप्रस्यतत्साधारण्यादितिनव्यमतायेतत्पामिप्यमेतेनगौरवमितिप्रागेवनिरस्तम् विशेषद
9 र्शनहेतुतायाञ्चनाधिववेपिउक्तायत्तिवारकसंशयसाधारणनियरीतज्ञानंप्रतिबंधकताधिक्यस्यपरि
हर्तुमशक्यत्वाच्च यत्तुमिश्रमते विपरीतज्ञानानुत्तरमस्यहेविपरीतज्ञानसामान्यस्यैकहेतुतावच्छावपि
लौकिकप्रत्यक्षस्थलापसमोनेह्यिपजन्यविपरीतज्ञानापनानाप्रतिबंधकतासुनिश्चयत्वानिवेशाल्ला
घवम् नत्वतन्मतेप्रतिबंधकतावत्तावच्छेदककोटौनिश्चयत्वानिवेशपिप्रतिबध्यतावच्छेदककोटौचाक्षुषा
दिविपरीतज्ञानत्वउत्तरत्वनिवेशान्नलाघवावकाशइतिवाच्यम् चाक्षुषादिविपरीतत्वउत्तरत्वनिवेशान्मना
हार्यत्वस्यचानिवेशेनलाघवादितितद्दपिनसंशयसाधारणचाक्षुषादिविपरीतज्ञानत्वेनप्रतिबंधकत्वेत्र

प्रामाण्यनिश्चयत्वावच्छिन्नस्यैव इत्तजनकत्वप्रयोगौरवात् चाक्षुषादिविषयविपरीतानिश्चयत्वेनत्वआरवेव
२० संशयसाधारण्या अप्रामाण्यज्ञानत्वानत्वावच्छिन्नस्यैवोत्तजनकत्वयालाघवादितिकृत्नमितिविस्तरेण छे
अप्रामाण्यज्ञानास्कंदितत्वाधबुद्धेर्विशिष्टबुद्धिप्रतिबंधकता अत्तएवविशेषदर्शनदशायांदोषवैशात्तरो
रवात्नरवेतरसेत्नादशबाधनिश्चयेपिस्वंत्वादिहेतुनारवन्यानुमितिरुपपद्यते विशेषदर्शनेनत्वन्नबाधनिश्च
येत्वमत्वग्रहात्वत्वातो अप्रामाण्यज्ञानानास्कंदितबाधनिश्चयस्यैव प्रतिबंधकत्वावाच्या अप्रामाण्यज्ञा
नानास्कंदितत्वंचविशेष्यतासामानाधिकरण्येन यत्संबंधावच्छिन्नप्रतियोगिताकाप्रामाण्यग्रहाभावव
शिष्टत्वं। विशेष्यतानिरूपितादिबाधनिश्चयदशायां एवन्नन्यवस्तुभाववज्ञानमप्रमेत्यप्रामाण्यग्रहसत्वेपि नप्रवेशोव
ह्निमानित्यादिविशिष्टबुद्ध्यापत्तिः विशेष्यताचार्धमाण्यप्रकारतानिरूपिताग्रहाभाव ननादशबुद्धेर्दौस्त्वादश
ज्ञाय एतद्वक्तित्वप्रकारतानिरूपितविशेष्यतात्मपत्वेपितत्त्वेत्रसंबंधावच्छिन्नप्रतियोगिताका प्रामाण्यग्र
हाभावविशिष्टत्वोपपत्तिः नचवस्तुभावज्ञानत्वावच्छिन्नविशेष्यताकाप्रामाण्यग्रहाभावनिवेशपत्तेनत्वतद २०

न्यवत्स्वभावच्छिन्नविशेष्यताकतज्ज्ञानाभावादिनिकत्वं विशे ष्यतानिवेशेनेनिवाच्यमतथासतितादृशबाधप्रमू
न्यकालेपितदन्यज्ञानत्वावच्छिन्नविशे ष्यतावृप्रामाण्यग्रहस्थले एतादृशाप्रामाण्यज्ञाना प्रामाण्यप्रकार
तानि रूपितविशेष्यता अपवाधस्थलेविशिष्टबुद्ध्यनुदयप्रसंगात् सामानाधिकरण्यनिवेशात् चैत्रस्यवन्ह्य
भावज्ञानत्रम भ्रमेस्याप्रामाण्यग्रहस्थलेपिवन्ह्यभाववनिश्चयवनोमैत्रस्यवह्निविशिष्टबुद्ध्यापत्तिः यत्तु अप्रा
10 माण्यज्ञानादित्तवा घवुद्धेरप्रतिबंधकत्वाय यन्नपेप्रमात्वेनज्ञाप्रमानत्वमेवप्रतिबन्धकतावच्छेदककोटौतनि
वेश्यते प्रमात्वेनज्ञाप्रमानत्वंचविशेष्य तासामानाधिकरण्येनायंसंबंधेन प्रमात्वप्रमात्वप्रकारकज्ञान
विशिष्टत्वमितिचिन्तनानाशिकन्मतं तन्न संम्यक् इदंज्ञानंप्रमानवेतिप्रामाण्यसंशयकालीनवाधनिश्चय
स्याविरोधित्वापत्तेप्रसात्वनिश्चयाव्यवहितत्वस्यैव तन्मतेनिवेशनापातदयेह्य पासंशयसाधारण्य
प्रामाण्यग्रहत्वावच्छिन्नाभावस्यैवनिवेश पीतुमुचितत्वात् नचा प्रामाण्यनश्चयप्रतियघकत्वावच्छेदकत्वे
वाधज्ञानेनिश्चयत्वंननिवेश्यते संशयात्मकवन्ह्यभावज्ञानेवन्ह्याप्रत्यक्षाविशेषप्रमात्वनिश्चयेवाज्ञानी

यनिश्चयत्वस्य तत्त्वाद्दिविशिष्टज्ञानेऽनुपगमे तन्निविरहाद्विनिगौरवावश इति वाच्यं एवमपि तत्त्वाद्यप्रका
२१ रकत्वरूपाख्यज्ञानीयनिश्चयत्वापेक्षया प्रामाण्यत्वाज्ञानीयनिश्चयत्वस्य तत्त्वाभाववद्विशेष्यकत्वावच्छिन्नतत्त्वमा
तप्रकारकत्वाभावाप्रकारकत्वस्य गुरुत्वपागौरवानवकाशात् एवं प्रमात्वाज्ञानस्यावच्छेदत्वापत्तेस्तत्त्वाभावबु
द्धौ न प्रमात्वं न वाऽप्रामाण्यग्रहो तत्र तत्रानुभवविरुद्धापत्तेः विशिष्टबुद्धेः एपनिः एतेनाप्रामाण्यग्रहाभावनिवेश
मते तद्विमतिनिवत्त्वाभावप्रकारकत्वस्य भावाभाववृत्तितत्त्वाभावप्रकारकं तत्त्वाभावावच्छिन्ने तत्त्वाभावप्रकारकं
इत्याकारकं स्वीकारकनानाविधत्वमात्मकज्ञानानां तत्त्वाभाववद्विशेष्यकत्वावच्छिन्नतत्त्वाभावप्रकारकार
कत्वाभावग्रहस्य तादृशप्रमात्वावच्छिन्नेदंग्रहस्य तत्त्वाभावकूटस्य प्रतिबन्धकतावच्छेदककोटौ निवेशनाप
त्तयानपद्यपेक्षया तत्त्वाभाववत्तितत्त्वाभावप्रकारकं इत्याकारकैकविधप्रामाण्यग्रहस्य निश्चयत्वेनाव्य
वच्छेदकत्वमुचितम् न च तन्निश्चयत्व तत्त्वाभाववद्धीप्रामा एवं प्रकारत्वाभावकटवानन्तपानलाघवमि
त्तिवाच्यम् भावकोटिका। संशयस्यानभ्युपगमेन तत्त्वमत्वरूपाप्रामाण्यप्रकारकत्वाभावस्य प्रामाण्यज्ञा

नीयनिरूपकत्वाघटकत्वात् तावद्द्विधाप्रामाण्यप्रामाण्यप्रकारतांशांप्रामाण्यनिरूपिततत्संसर्गावच्छिन्नत्व
नानुगमप्येकतावनिवेशासंभवाच्चेत्यपि निरस्तम् ननु हि द्वित्वमस्त्वा तावद्रूपप्रमात्वकालीनबाधवद्विःप्र
तिबंधकत्वोपपत्तये तथाविधप्रमात्वनिरूप्य पाणां सर्वेषामेवावच्छेदकत्वपालाघवानवकाशः यद्वितार
शप्रमात्वविरूप्य पस्थानपितत्त्वजातिप्रकारकरूपलघुशरीरप्रमात्वनिरूप्य पोयावत्तोपपद्यते तावदिष्यत न
एवविशिष्टत्वद्वित्रित्वनगुरुशरीरप्रमात्वनिरूप्याणांअवच्छेदकत्वमुपपद्यते तदाऽस्माभिरपि लघुशरीरत्वा
न्हिमद्विशेष्यकत्वावच्छिन्नवत्त्वतावप्रकारकत्वहयाप्रा माण्यग्रहस्येवातावो निवेशवीपः। गुरुशरीराप्रामाण्य
यग्रहकालेचपावत्तलघुशरीराप्रामाण्यग्रहसत्त्वतावत्तनवस्येवविःशिष्टवद्वित्रित्ववक्तुं शक्यतत्त्वस्मादप्रा
माण्यग्रहाभावनिशिष्टवाधत्तिरूप्यत्वेनैवप्रतिबंधकत्वमुचितं न मितिं। यत्तु। वाधनिरूप्यपस्यस्वसामा
नाधिकरण्यग्रहव्यवाहितोत्तरोत्पत्तिकत्वेन प्रसंवचेनवावनिरूप्यपवदन्यत्त्वमेव प्रतिवध्यतावच्छेदकंअ
न्यथाऽस्मनाहार्यत्वंसोत्कि कान्यत्वतत्ताद्वेषयायगाहित्वानाम्प्रतिवध्यतावच्छेदककोटिनिवेशेनगौरवात्।

तथा चाप्रामाण्यग्रहकाले बाधनिश्चयवद्बुद्धेरबोध्यसामान्यस्य निरुक्तप्रतिबध्यतावच्छेदकानाक्रांतत्वात्तन्मप्रामाण्य
२२ ज्ञानोत्तेजकत्वम् न चैवं यादृशयादृशसामग्र्या वालादृप्रामाण्यज्ञानानास्कंदितबाधबुद्धिदशायां विशिष्टबुद्धिरुत्प
न्ना तादृशसामग्र्या बाधाभावघटितत्वात्प्रामाण्यज्ञानानास्कंदितबाधदशायामपि सत्त्वेन तद्बुलानत्र विशि।
ष्टबुद्धिसामान्यापत्तिरिति वाच्यम् बाधविषयकाप्रामाण्यग्रहवद्विशिष्टबुद्धिमति तादृशाप्रामाण्यज्ञानका
लीनविशिष्टबुद्धिसामग्र्या बाधाभावघटितत्वेऽपि तादृशाप्रामाण्यग्रहघटितत्वात्प्रामाण्यज्ञानानास्कंदित
बाधदशायां तदसत्त्वस्यायादृकानावात् न चाप्रामाण्यग्रहबाधाभावयोः कारणताद्वयकल्पनायेत्तत्वात्प्रामा
ण्यग्रहाभावविशिष्टबाधाभावस्यैकहेतुताकल्पनमेवोचितमिति वाच्यम्। विशिष्टाभावहेतुत्वेऽपि विनिगम
नाविरहेण कारणताद्वैरावश्यकत्वादिति तदसत् अप्रामाण्यग्रहस्येहस्यैतुत्वोपगमे पर्वतो वह्निमानवानि
त्यादिनिश्चयकाले एतदन्यवत्स्वभावज्ञानप्रयोजकाप्रामाण्यग्रहाभावाभावादित्याकारकज्ञानोत्तरं विष
यकाप्रामाण्यग्रहसत्त्वे तदन्यादि। विशिष्टबुध्यापत्तेः अस्मन्मते विशेष्यतासामानाधिकरण्येन प्रसक्ति २

वन्नप्रतियोगिताकाप्रामाण्यग्रहाभावविशिष्टबाधबुद्धेः प्रतिबंधिकाया पासत्वेनापत्त्यभावात् नचाप्रा
ण्यग्रहस्य हेतुतामतेपि यादृशाप्रामाण्यग्रहव्यक्तेरग्रहणे विशिष्टबुद्धिरुत्पद्यते तादृशव्यक्तीनामेव तद
शविशिष्टबुद्धिहेतुत्वं कल्प्यते फलानुरोधात् न तत्ताप्रामाण्यग्रहव्यक्तीनामिति वाच्यं तथा सत्यप्रामाण्य
ग्रहव्यक्तीनां तत्तद्व्यक्तित्वेन हेतुत्वकल्पने नाप्रामाण्यग्रहव्यक्तिसमसंख्यानंतकारणतापत्तेः अस्मन्मते वह्नि
माद्विशेष्यकत्वावच्छिन्नव ह्न्यभावप्रकारकत्वप्रकारकज्ञानत्वेनानुगमय्य सकलव्यक्तीनां एकाभावस्य प्रतिबं
12 धकतावच्छेदकत्वोनिवेशनेन लाघवादिति दिक् पर्वतो वह्निमान् वह्न्यभाववांश्चेति समुच्चयोत्तरं तादृश
मुच्चयोपपत्तये ग्राह्याभावधर्मिकाव्याप्यवृत्तित्वज्ञानस्यापि ग्राह्याभाववन्निष्ठप्रतिबंधकताप्रयुक्ते
जकत्वं स्वीकरणीयम् प्रमुच्चयस्याव्याप्यवृत्तित्वज्ञानदशायामेवोत्पद्यते अतो न व्यभिचारः नचैवं समुच्चाया
त्मकबाधनिश्चयोत्तरमिव समुच्चयानात्मकबाधनिश्चयोत्तरमपि अव्याप्यवृत्तित्वज्ञानवान्नासमुच्चयात्म
कविशिष्टबुद्ध्यापत्तिरिति वाच्यम् अव्याप्यवृत्तित्वज्ञानसत्त्वे इष्टत्वात् नचाव्याप्यवृत्तित्वज्ञानस्यानजकत्वस्य

व्याप्यवृत्तित्वज्ञानत्वेवाप्यनिश्चयोन्नरसंशयएवकथंनोत्पद्यतेइतिवाच्यम् अव्याप्यवृत्त्याविरुद्धत्वरूप
नयानज्ञानस्यसंशयविरोधावगाहिज्ञानप्रतिबंधकंतयानन्तत्वेसंशयएवनोत्पद्यते एतेनसमुच्चयो
२३ त्पत्तिकालेसंशयोत्पत्तिरपिनिरस्ता अव्याप्यवृत्तित्वाज्ञानस्यसंशयप्रतिबंधकस्यसमुच्चयोः पूर्वक्षा
लेनियमतः सत्वात्तप्रयत् समुच्चयात्मकप्रतिबंधकस्यकार्यकालेसत्वादेवतदानींसंशयवारणं तदसत्त्व ता
दानीमात्मत्वाभावावगाहिनः समुच्चयत्वपि यथा अव्याप्यवृत्तित्वज्ञानरूपोत्तेजकबलात्समुच्चयात्मक
विशिष्टबुद्धिरुत्पद्यतेतेन आसंशयात्मत्तेऽमेरपिनादवस्थात् केचित्तु समुच्च येव्यभिचारवारणाय वा
धाभावजन्यतावच्छेदककोटौ ग्रात्स्ये विशेष्यविषयतानकोटौ विरोधावगाहित्वस्यनिवेशः समुच्चयस्यविरोध।
विषयकत्वान्नव्यभिचारः नवैवंपर्वतोवह्निमान्नित्याकारकस्यसमुच्चयात्मकनिश्चयस्यपर्वतोव
ह्निमानवह्न्यभाववानित्यादिनिश्चयप्रतिबध्यत्वानुपपत्तिविरोधाविषयकत्वादितिवाच्यम्समुच्चयात्तिरि २३
क्तविशिष्टबुद्धिरेवैकाधिकरणयोः संसर्गघटकतयाविरोधभानोपगमात्।नचविरोधो

विषयतयाःप्रतिबध्यतावच्छेदककोटिनिवेशेऽपिपर्वतोवह्न्यभाववान्वह्निमांश्चवह्न्यभावाद्यधिकरणवृत्तिश्चेतिसमु
हालंबनात्मकसमुच्चयेव्यभिचारेउपरि तस्यापिविरोधविषयकत्वादितिवाच्यं वह्न्यभावाधिकरणवृत्तिविशिष्टसंयो
गादिसंसर्गकवह्न्यादिविशिष्टबुद्धित्वस्यैववह्न्यभावादिमत्तानिश्चयप्रतिबध्यतावच्छेदकत्वोपगमेऽप्युपदर्शितसमूहा
13 लंबनस्यऽखलविषयताशालित्वपितादृशविरोधावच्छिन्नसंयोगादिसंबंधेनवह्न्याद्यप्रकारकत्वेनव्यभिचारानव
काशात् नचाविरोधविषयता याबाधप्रतिबध्यतावच्छेदकत्वेपितादृशविरोधानिश्चयदशायांमव्याप्यवृत्तित्वज्ञा
नसत्वेऽपिविरोधाविरोधाविषयकविशिष्टबुद्ध्यापत्तिस्तस्याबाधनिश्चयात्प्रतिबध्यत्वादितिवाच्यमविरोधावि
षयकज्ञानेऽव्याप्यवृत्तित्वज्ञानस्यकारणत्वोपगमेनमेनतादृशकारणविरहादेवतदानीं विरोधादिविषयक
ज्ञानोत्पत्तिविरहात् अव्याप्यवृत्तित्वज्ञानस्यउत्तेजकत्वेप्रतिबंधकतावच्छेदककोटिप्रविष्टनानाविधाभावा
एवज्ञानाभावैःसमंमिथोविशेषणविशेष्यभावेविनिगमविरहेणप्रतिबंधकतावच्छेदकं रुद्धेरवच्छेदकगौर
वस्यचापातात् अव्याप्यवृत्तित्वज्ञानस्यविरोधविषयकज्ञानेसत्वं न्हेतुतावच्छेदकत्वात् नचवह्न्यभावादि

निश्चयदशायामव्याप्यवृत्तित्वज्ञानसत्वेवह्निमान्नह्रदभावबाध्येस्साकारकसमुच्चयदेकैककोटिकविरोध्याविरोधा
२५ विषयकवन्त्वादितिश्चयापितिरितिवाच्यंइष्टत्वात्तव्याप्यवृत्तित्वज्ञानस्योत्तेजकतामतेपितद्दुन्यतेरा
वश्यकत्वात् अथवन्ह्यभाववान्निश्चयसत्वेवन्ह्यभावोव्याप्यवृत्तिरितिज्ञानसत्वेविरोध्यवि षयिणीत्वदविष
यिणीचवन्हिविशिष्टबुद्धिजायमानाहाशोनयविध्यविशिष्टबुद्धिहेतन्मतयोबाधाभावेव्याध्यवृत्तित्वज्ञानयोःसत्वात्
नन्वेष्टापत्तिःएकदाज्ञानद्वयोत्पादस्यासिद्धांतविरुद्धत्वात् एकव्याज्ञानव्यक्तेर्लौचरोधविषयत्वतद्विरोधविषय
कज्ञानायस्यसंभवात् इतिवाच्यंवन्ह्यभावादिविरोधविशिष्टसंयोगसंसर्गकवह्निविशिष्टबुद्धेर्ग्नाह्याभावनागा
ह्निनोविपरीतकोटिधर्मिकव्याप्यवृत्तित्वज्ञानस्यप्रतिबंधकत्वेमानाभावात्ता एतद्दनुरोधेनतत्कल्पनेगौरवात्।
नवाव्याप्यवृत्तित्वज्ञानस्योत्तेजकतामतेसंमुच्चयोन्यतिकालेसंशयापत्तिवारणायविरोधीवगाहिज्ञानंप्रसत्या
व्यवृत्तित्वज्ञानप्रतिबंधकताया आवश्यकल्पनीयनेत्तिनगौरवमितिवाच्यम यतः कोटिद्वयधर्मिकाव्याप्यवृ
त्तित्वज्ञानकालेएवकोटिद्वयसमुच्चयः नत्वेककोटिमात्रधर्मिकज्ञानदशायांसशयेचविपरीतकोटिविरोधवि २

शिष्टस्यकोटेरेवनिरूपितत्वसंबंधेनस्वनिरूपितसंसर्गतावच्छेदकत्वमुपे एवंचतत्कोटावव्याप्यवृत्तित्व ज्ञानस
त्वेतत्तद्विपरीतकोटिविरोधस्यव्यावर्त्तकधर्मदर्शनसत्वेनविशेषणतयासंसर्गघटकानुपस्थितिनभानसंभवः संसर्गघ
टकविशेषणविषयताया धारणप्रकारत्वावच्छिन्नविषयतानिरूपकधर्मस्यैवविपरीत ज्ञानप्रतिबंधकतावच्छेद
कत्वात्। एवंचविरोधावगाहितत्कोटिविशिष्टबुद्धौ तद्विपरीतकोटिधर्मिकाव्याप्यवृत्तत्वज्ञानप्रतिबंधकता
14 कल्पनंविनैव संशयोत्पत्तिकालेसंशयापत्तिवारणं एवं भवतीतिनाव्याप्यवृत्तित्वज्ञानोत्तेजकतामतेवि
षयकतत्तद्विषयकबुद्ध्यापत्तेश्च नचविरोधासंसर्गकतद्विशिष्टबुद्धौतत्कोटिधर्मिकाव्याप्यवृत्तित्वज्ञानस्यैव
हेतुत्वोपपत्ते ननुविपरीतकोटिधर्मिकाव्याप्यवृत्तित्वज्ञानस्य एवंचोक्तस्थलेवह्निधर्मिकाव्याप्यवृत्तित्वज्ञा
नरूपकारणविरहात्त विरोधासंसर्गकवह्निविशिष्टबुद्ध्यापादनासंभवेन एकदाविरोधविषयकतत्तद्विषयकज्ञा
नापत्तिस्तादृशाव्याप्यवृत्तित्वज्ञानसत्वेबाधाभावसत्वेचउक्तयुक्त्याविरोधसंसर्गकवह्निविशिष्टबुद्ध्यापादना
सम्भवेन तदानीमपिनविरोधविषयकतत्तद्विषयकज्ञानापत्तिरितिवाच्यं विरोधासंसर्गकतत्कोटिविशिष्टबुद्धौतत्

न्कोटिधर्मिकाव्याप्यवृत्तित्वज्ञानस्य हेतुत्वे पर्वतो वह्न्यभाववानित्येतादृशबाधनिश्चयदशायां वह्न्यभावो व्य
२५ प्यावृत्तिरिति ज्ञानसत्त्वे ऽनुभवसिद्धपर्वतो वह्निमानित्यसंतादृशबुद्ध्युत्पत्त्यापत्तेः बाधसत्त्वेन विरोधिविषयिता यावद्वह्नि
धर्मिकाव्याप्यवृत्तित्वज्ञानविरहेण विरोधिविषयित्वाद्वस्तादृशबुद्धेरुत्पादासंभवात् एवम् विरोधितासंसर्गकविशिष्ट
बुद्धित्वेनाव्याप्यवृत्तित्वज्ञानानवच्छिन्नतावच्छेदकं रूपेणोक्तस्थले बाधाभाववत्ता विरोधसंसर्गकविशिष्टबुद्धेस्तापमानापा
नदसंसर्गकविशिष्टबुद्धिरव्याप्यवृत्तित्वज्ञानवत्कादाचित्कत्वे अपि विपताकविशिष्टबुद्धावुत्पमानायाविरोधानव
च्छिन्नसंयोगादिनिसंसर्गावविषयताकविशिष्टबुद्धिरिष्यत एव तादृशबुद्धेरेव तथात्वोपगमात् । विरोधावच्छिन्नत
दनवच्छिन्नविषयतया विरोधविरहेणैकत्र द्विविषयत्वोपगमेत्विति विरहात् अथ विरोधावच्छिन्नसंयोगादिविषयता॰
२६ पावाधप्रतिवध्यतावच्छेदकत्वोपगमे शुद्धसंबंधघटितव्याप्त्यवगाहिपरामर्शजन्यापाः पर्वतो वह्निमानित्याद्यनु
मितेर्बाधबुद्ध्य प्रतिवध्यत्वप्रसंगः तस्यैर्विरोधिविशिष्टसंयोगाद्यसंसर्गकत्वात्तविरोधिविशिष्टस्योगादिसंसर्ग
कानुमितेस्तादृशसंबंधघटितव्याप्त्यवगाहिपरामर्शस्य हेतुत्वपातदजन्यानुमितेस्तादृशसंसर्गविगाहित्वासंभवात् २५

न्निचेन्न। अव्याप्यवृत्तित्वाज्ञानशून्यकालीनायाः सुद्धसंयोगसंबन्धघटितव्याप्त्यवगाहिपरामर्शजन्यानिखिलानुमि
रपिविरोधविशिष्टसंयोगादिसंसर्गकत्वमुपसन्ने निरोधविशिष्टसंयोगादिघटितपरामर्शनिरहेपिवाधा
भावादिवन्नादेवानुमितौ विरोधविशिष्टसंयोगादितासंसर्गविषयानानंसत्त्ववान् अन्यलिंगकानुमितौ व्यभि
15 चारवारणाय परामर्शान्तिन्यूनानवच्छेदकगर्भे अव्यवहितोत्तरत्वनिवेशस्यावश्यकतया तादृशपरामर्शानंतरोत्पन्ना
नुमितौ विरोधविशिष्टसंयोगादीनां संसर्गतया भानेपि तत्र व्यभिचारानवकाशात् नचैवं वाधं बुद्धित्वीयस्थलपत्र शु
द्धसंयोगासंयोगासंसर्गघटितव्याप्त्यवगाहिपरामर्शोत्पन्नानायांशे अव्याप्यवृत्तित्वावगाहितदनंतरं सुद्धसंयोगादि
नासाध्यानुमितौ जातायामपि तस्मादेव परामर्शाद्विरोधविशिष्टसंयोगादिसंसर्गेनः साध्यानुमितिप्रसंगः तादृशानु
मितेः संसर्गशेष्वविकावगाहि तयाप्राथमिकशुद्धसंयोगादिनासाध्यानुमित्यात्मकसिध्यप्रतिवध्यत्वापत्तिरितीवाच्यम्॥
शुद्धसंयोगादिसंसर्गघटितव्यापकत्वावगाहिपरामर्शजन्यानुमितौ विरोधानवच्छिन्नाध्यपा अपि संयोगादिसंसर्ग
कविषयतायानियमतोऽभ्युपगमेन तथाविधपरामर्शजन्यसकलानुमितीनामेवानवच्छिन्नसंयोगादिसंसर्गक

सिद्धिप्रतिबध्यतावच्छेदकाक्रांतत्वयातथाविधसिध्यभावसहकृतस्यैवतथाविधपरामर्शस्यफलोपधायत्वविरह इति
वदंतित्तत्रेदंचिंतयामः विरोधविशिष्टसंयोगादिसंसर्गावविशिष्टबुद्धित्वस्यशुद्धसंयोगादिसंबंधावच्छिन्नप्रतियोगी
२६ ताकाग्न्याद्यभावनिश्चयोदिप्रतिबध्यतावच्छेदकत्वेविरोधविशिष्टसंसर्गावच्छिन्नप्रतियोगिताकग्न्याद्यभावादिनि
श्चयकालेप्रसिद्धायाः शुद्धसंयोगसंसर्गकविशिष्टबुद्धेर्विनैवग्न्याद्यभाववद्धर्मिकव्याप्यवृत्तित्वज्ञानंशुद्धसंयोगादिसं
बंधावच्छिन्नप्रतियोगिताकग्न्याद्यभावादिनिश्चयकालेऽप्यापत्तिः तादृशविशिष्टबुद्धेर्विरोधविशिष्टसंयोगादिसं
बंधावच्छिन्नप्रतियोगिताकग्न्याद्यभावादिनिश्चयवत्तोनविरोधितानासंभवात् तस्याश्चाबाधसामान्यप्रतिबध्य
त्वात् अव्याप्यवृत्तित्वज्ञानस्यतादृशविशिष्टबुद्धौव्यभिचारवारणायागत्यातद्व्यवहितोत्तरान्यतिकत्वस्यतज्जन्य
तावच्छेदककोटौनिवेशनापत्त्यातादृशबुद्धेर्बाधाभावाव्याप्यवृत्तित्वज्ञानस्यतन्नावच्छेदकेनापिअनाक्रांतत्वात्
बाधाभावाव्याप्यवृत्तित्वज्ञानरूपकारणविरहस्याप्यकिंचित्करत्वात् केचित्तुलक्ष्मनाहापविशिष्टबुद्धौव्यभिचारवार २६
णायस्वसामानाधिकरण्यस्वाव्यवहितोत्पत्त्युत्तरान्यतिकत्वसंबंधेनबाधनिश्चयप्रवदन्यत्वंबाधनिश्चयप्रतिबध्यता

तावच्छेदककोटौ निवेशेनापम् तथान्वत्र एवं वाव्याप्यवृत्तित्वज्ञानकालानवाधनिश्चयानन्तरोत्पन्नविशिष्टबुद्धेर्वाध
प्रतिवध्यतावच्छेदकानाक्रांतत्तयावाधनिश्चयकाले विनेवाव्याप्यवृत्तित्वक्रांतदापत्तिरितितद्वारणायाव्याप्यवृ
त्तित्वज्ञानविशिष्टायाविशिष्टबुद्धेरव्याप्यवृत्तित्वज्ञानहेतुत्वंकनीयम उत्तेजकत्वायेन्न याहेतुत्वकल्पने लाघव
स्याप्य दर्शितत्वात् विरोधविशिष्टसंयोगादिसंसर्गावछिन्नप्रतियोगिताकवाधनिश्चयकालीनायाः पूर्वकल्पे
16 वाधनिश्चयप्रतिवध्यतावच्छेदकानाक्रांतत्तयाविशिष्टबुद्धेरपि एतन्मतेनदाक्रांतत्वनिरावाधमेवतस्यापि उक्तसं
वंधेनवाधनिश्चयवदन्यत्वादितिन पूर्वकल्पेभ्यापत्तिसम्भवः एवं संशयानिरिक्तज्ञानसंवंधविधयाविरोधज्ञाना
भ्युपगमे चिह्नतिविरहात्संशयातिरिक्तज्ञाने संसर्गविधयाविरोधज्ञानमप्रामाण्यकमेवेत्याहुः छं: आहार्यवा
धबुद्धिविशिष्टबुध्यविरोधित्तयाअनाहार्यत्वंवाधनिश्चयप्रतिवंधकतावेछदककोटौ निवेश्यम अथ किं तावदनाहार्य
त्वंवस्त्राभावादिमज्ज्ञानिर्णीयस्य न तावद्विशेष्यतासामानाधिकरण्यानन्तर्पत्रित्तपत्रित्तपंसंवधेन पक्षस्याभावादिम
कारकेच्छाविशिष्टं तदसत्वं तर्थोसत्तिविरोधिज्ञानविरहकालीनस्य पर्वत्ते वन्ह्यभावस्यप्रसक्तंजापत्तामिसाकारके

२७ ज्ञानं नरङ्गत्वप्रकारकस्य पर्वतो वह्न्यभाववानित्यादिनिश्चयकालीनस्याहार्यत्वानुपपत्त्यान्तदुत्तरं वह्न्यादिविशिष्टबुद्ध्यापत्तिः
नत्वसमानधर्मितावच्छेदकवह्न्यादिमत्तानिश्चयस्य स्वसामानाधिकरण्यसम्बन्धावच्छिन्नतोत्तरोपनीतत्वसंबंधेन वैशिष्ट्य
प्रतियोगिकोटौ निवेशने अतो नेयमनुपपत्तिरिति वाच्यम् एवमप्यानुमानिकवह्न्यादिमत्तानिश्चयकालीनस्य उपदर्शि
तिच्छेविशिष्टलौकिकवह्न्यभावादिनिश्चयस्य अनाहार्यत्वानुपपत्तेः नचलौकिकत्वस्य प्रतियोगिनि निवेशनीयतया
तत्र विशिष्टभेदो ऽस्त्येवेति वाच्यम् एवं सति समाने हि पक्षे न्यवह्न्यादिमत्तानिश्चयविशिष्टेच्छाविशिष्टलौकिकज्ञा
नतो ऽपि वा तदिन्द्रियजन्यवह्न्यादिमत्तानिश्चयविशिष्ट इच्छाविशिष्टलौकिकालौकिकसाधारणतत्तादिन्द्रियजन्यज्ञानने
इकटोपि अनाहार्यत्वशरीरे निवेशनापः एवं च स्वाश्रयानुमानिकस्यानावच्छिन्नवत्तानिश्चयविशिष्टेच्छाविशिष्टलौकिक
ज्ञानजनितत्वमपि तत्र निवेश्यम् अन्यथा तादृशनिश्चयकालीनेच्छाविशिष्टवह्न्यभावादिमत्त्वप्रकारस्यानाहार्यत्वानुप
पत्तिरिति चेन्न एवमपि आहार्यवह्न्यादिनिश्चयकालीनेच्छाविशिष्टप्रत्यक्षस्य अनाहार्यत्वानुपपत्तिः नच दृष्टापत्तिः २७
विरोधिज्ञानकालीनेच्छाधीनज्ञानस्यैवाहार्यतया आहार्येतरया आहार्यवह्न्यादिमत्तानिश्चयाधीनवह्न्यभावादिविशि

च्चबुध्युविरोधिविराधितपातकौलानवच्छिन्नावादिनिश्चयस्य आहार्यत्वासंभवात् अनाहार्यवत्त्वादिमत्ता निश्चयवैशिष्ट्य
स्यप्रतियोगिकत्वे निवेशे च अन्योन्याश्रयः वत्त्वादिमत्तानिश्चयनिष्ठस्यानाहार्यत्वस्य अनाहार्यवत्त्वाभावादिमत्ता
निश्चयविशिष्टेच्छाविशिष्टान्यत्वरूपतया वत्त्वाभावादिमत्तानिश्चयनिष्ठानाहार्यत्वघटितत्वात् यत्तु जन्मतासंबंध
